संस्कृत-वार्ता:
11.08.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्र-मोदिना अद्य नव दिल्लीस्थे भारत-कृषि अनुसन्धान-संस्थाने जलवायुसमेकित उत्पादाधारितानां सस्यानां नवोत्तरैकशत प्रकारकाणि सस्यबीजानि प्रख्यापितानि ।
- विदेशमन्त्रिणा डॉ. सुब्रह्मण्यम जयशंकरेण प्रतिपादितं यत् प्रशासनं भारत-मालदीव-अन्य-क्षेत्रीय-जनानां लाभाय मालदीव-देशेन सार्धं घनिष्ठ सम्बन्धान् प्रति वचनबद्धं वर्तते।
- ह्य: जम्मू-कश्मीरस्य अनंतनाग जनपदस्य कोकेरनाग क्षेत्रे आतंकवादिन: सुरक्षाबलयो: च मध्ये युद्धस्य काले द्वौ सैनिकौ एक: नागरिक: च मृत्युमुपगता:।
- बांग्लादेशस्य अन्तरिमसर्वकारस्य प्रमुखः मोहम्मदयुनुस्वर्यः देशे अल्पसंख्यकसमुदायस्य उपरि आक्रमणानां घोरनिन्दां कृतवान्।
- उत्तराखण्डे 'चारधाम यात्रा मार्गे' विभिन्नेषु स्थानेषु भूस्खलनेन वाहनानां गमनागमनं बाधितम्। हिमाचलप्रदेशस्य विभिन्नेषु भागेषु जलाप्लावेन भूस्खलनेन च कतिपयक्षेत्रेषु जना: पीडिता:।
- सप्ताहत्रयं यावत् रोमांचकारिणां क्रीडाकार्यक्रमाणां अनन्तरं पेरिस् ओलम्पिकक्रीडाया: अद्य रात्रौ सम्पन्नता अस्ति।

<u>प्रधानमन्त्री-कृषि</u>

प्रधानमन्त्रिणा नरेन्द्र-मोदिना अद्य नव दिल्लीस्थे भारत-कृषि अनुसन्धान-संस्थाने जलवायुसमेकित उत्पादाधारितानां सस्यानां नवोत्तरैकशत प्रकारकाणि सस्यबीजानि प्रख्यापितानि । एतेषु नवोत्तरैकशतबीजेषु चतुस्त्रिंशत् क्षेत्रीय-शस्यानि , सप्तविंशतिः उद्यानशस्यानि समेत्य अन्य शस्यबीजानि सम्मिलितानि सन्ति। कृषि-शस्येषु द्विदलम् , ईक्षु, कर्पासं चेत्यानन् शस्यानां समेत्य विविध शस्यानां बीजानि सन्ति। एतदतिरिच्य उद्यानशस्येषु फलानि , शाकानि , पुष्पाणि औषधीय-पादपाः च सम्मिलिताः सन्ति। अवसरेस्मिन् प्रधानमन्त्रिणा कृषकैः वैज्ञानिकैः च साकं परिचर्चा विहिता। एतेषु विषयेषु परिचर्चां कुर्वन् प्रधानमन्त्री कृषि क्षेत्रेषु अपि मूल्यवर्धनस्य महत्त्वं सबलं प्रतिपादितवान्। कृषकैः प्रतिपादितं यत् एतानि नवीनानि शस्योत्पादकानि बीजानि अत्यधिकानि लाभदायकानि भविष्यन्ति। यतोहि एतानि बीजानि तेषां कृषि-व्यये न्यूनीकरणं करिष्यन्ति। सममेव पर्यावरणस्य अपि संरक्षणं करिष्यन्ति। असौ प्राकृतिक-कृषेः लाभानि समेत्य जैविक-कृषिं प्रति जनानां संवर्धित-विश्वासस्य विषये अपि परिचर्चां विहितवान्। असौ प्रोक्तवान् यत् जनाः जैविक-खाद्य-पदार्थानाम् उपभोगस्य याचनां कुर्वन्ति। कृषकैः प्राकृतिक-कृषिमाधृत्य प्रशासनद्वारा

विहितानां पदक्षेपानां प्रशंसां अपि कृता। प्रधानमन्त्री परामर्शं यच्छन् प्रोक्तवान् यत् कृषि विज्ञान केन्द्र द्वारा कृषकेभ्यः प्रत्येकं मासे सक्रियरूपेण तेषां लाभानां विषये जागरुकं कर्तुं च सूचना दातव्या।

## जयशंकर

विदेशमन्त्रिणा डॉ. सुब्रह्मण्यम जयशंकरेण प्रतिपादितं यत् प्रशासनं भारत-मालदीव-अन्य-क्षेत्रीय-जनानां लाभाय मालदीव-देशेन सार्धं घनिष्ठ सम्बन्धान् प्रति वचनबद्धं वर्तते। डॉ. एस.जयशंकर: त्रिदिवसीय यात्रायै मालदीव देशे वर्तते। तेनोदीरितं यत् भारत-मालदीवयो: च सहकार्यं पारम्परिकभूमिकाया: परं याति यत: मालदीव: हिन्दमहासागरक्षेत्रस्य प्रमुख: भाग: अस्ति। मालदीवदेशे अड्डू-पुनर्प्राप्ति-परियोजनाया: अड्डू-तट-संरक्षण-परियोजनाया: च उद्घाटनं कुर्वन् डॉ् जयशंकर: अवोचत् यत् अस्माकं विकाससहकार्यस्य उद्देश्यं मालदीवदेशस्य जनानां जीवनस्य सर्वान् पक्षान् ज्ञातुं, तेभ्य लाभान् दातुं च उपायान् अन्वेष्टुं वर्तते। डॉ. जयशंकरेण राष्ट्रपतिनम् डॉ. मोहम्मद-मुइज्जु वर्येण समं सम्भाषणमपि विहितम्। तयो: मध्ये रक्षा-सुरक्षा सम्बद्ध सहयोग-सामुद्रिक-सुरक्षायै संयुक्त-पदक्षेपानां विषये शान्ति-स्थिरतां च सन्धारयितुं तेषां हितानां विषये चर्चा जाता। डॉ. जयशंकरेण मालदीव-देशस्य अष्टाविंशति-द्वीपेषु, जल-स्वच्छता-सम्बद्ध परियोजनानां अपि आभासीय-तन्त्रांशस्य उद्घाटनं कृतम्।

## जम्मू

ह्य: जम्मू-कश्मीरस्य अनंतनाग जनपदस्य कोकेरनाग क्षेत्रे आतंकवादिन: सुरक्षाबलयो: च मध्ये युद्धस्य काले द्वौ सैनिकौ मृत्युमुपगतौ। अस्मिन् एव क्रमे द्वौ नागरिकौ च व्रणितौ। तेषां कृते तत्क्षणमेव चिकित्सालीय व्यवस्था च कृता। अवधेयं यत् अन्तिम् कालं यावत् सैनिका: संघर्षे आस्ताम्। रक्षामन्त्री राजनाथ-सिंह: अनन्तनागनगरे आतंकवादविरोधि-कार्यक्रमे भारतीय-सेनाया: वीर-निर्भय-सैनिकानां मृत्यो: विषये दु:खं प्रकटितवान् ।

## बांग्लादेश

बांग्लादेशस्य अन्तरिमसर्वकारस्य प्रमुखः मोहम्मदयुनुस्वर्यः देशे अल्पसंख्यकसमुदायस्य उपरि आक्रमणानां घोरनिन्दां कृतवान्। नोबेल् पुरस्कारविजेता युनुस्- महोदयः विरोधान्दोलनानां नेतृत्वं कुर्वद्भिः छात्रैः सर्वेषां हिन्दू-इसाई-बौद्ध-परिवाराणां रक्षां कर्तुम् आग्रहं कृतवान्।

संयुक्त राष्ट्र महासचिव अंतोनियो गुत्तेरश इत्यस्य उप -प्रवक्ता फरहान हकः बांग्लादेशे अल्पसंख्यकेषु आक्रमणमस्य निन्दां कुर्वन् वर्ग-धर्मस्य कस्यापिः हिंसायाः विरोधमालक्ष्य संयुक्त राष्ट्रस्य प्रतिबद्धतां प्रकटितवान्। श्रीहकेन हिंसा प्रभावितानां हिन्दूनां अन्य अल्पसंख्यकजनानां च पुनर्वासे सहायतार्थं संयुक्त- राष्ट्रस्य वचनबद्धता प्रकटितास्ति। अस्मिन्नेव क्रमे प्रदर्शनकारिणः अल्पसंख्यकेषु आक्रमणमाधृत्य विशेष-प्रावधान अधिनियमानां निर्माणाय संसदि दशप्रतिशतमितानि आसनानि अल्पसंख्यकेभ्यः आवंटयितुं अथ च अल्पसंख्यक-संरक्षण विधेः विनिर्माणाय याचनां कुर्वन्ति स्म।

अल्पसंख्यकैः सह मुस्लिम-समुदायस्य सहस्राधिकजनैः अपि प्रदर्शने प्रतिभागिता कृता। अमेरिकायाः वाशिंगटने अपि ह्यः बृहद् संख्यायां प्रदर्शनकारिणः हिंस्रघटनां विरुद्ध्य प्रदर्शनं विहितवन्तः। अस्मिन्नेव क्रमे भारतीय मूलस्य अमरीकीय सांसदैः अमेरिकायाः विदेश-मंत्रिणं एंटनी ब्लिंकेनं पत्रं विलिख्य बांग्लादेशे सञ्जाते हिंस्र प्रभावित जनेभ्यः संसदि वादश्रवणस्य याचनां विहितवन्त:।

<u>उत्तराखण्ड</u>

उत्तराखण्डे ‘चारधाम यात्रा मार्गे’ विभिन्नेषु स्थानेषु भूस्खलनेन वाहनानां गमनागमनं बाधितम्। उत्तरकाशीमण्डलस्य गंगोत्री-राष्ट्रियराजमार्गे नेताला ज्ञानसु च समीपे भूस्खलनेन यातायातस्य मार्गा: अवरुद्धा: जाता:। यमुनोत्री राष्ट्रीयराजमार्गश्च अवरुद्ध:। तत्रैव, चमोली जनपदे बद्रीनाथ राष्ट्रीयराजमार्गे भूस्खलनेन गमनागमनं प्रभावितमस्ति। अवधेयमस्ति यत् राज्ये प्राय: शतमार्गा: भूस्खलनानन्तरं निरुद्धा: जाता:।

<u>हिमाचल</u>

हिमाचलप्रदेशस्य विभिन्नेषु भागेषु प्रचण्ड-वृष्टि: अविरतं प्रवर्तते। जलाप्लावेन भूस्खलनेन च कतिपयक्षेत्रेषु जना: पीडिता:। जनजातीय जनपद किन्नौरस्य पूह क्षेत्रे आकस्मिक जलाप्लावेन तत्र भूस्खलनं जातम्। तत्रत्य मार्गा: अवरुद्धा: सन्ति। एतद् अनुमन्यते यत् मेघस्य विस्फोटानन्तरं आकस्मिकं जलप्लावनं जातम्। किन्तु, अनेन कोऽपि क्षति: न अभिज्ञात:। एतदतिरिच्य, सिरमौर जनपदे गतरात्रौ प्रचण्डवृष्टि: सञ्जाता येन यमुना मारकंडा नद्यो: च प्रवाह: अस्ति। अद्य प्रात: नाहनस्य बङ्कालनक्षेत्रे नद्या: प्रवाह: एतावत् प्रबल: आसीत् येन मार्कण्डनद्या: तटे निर्मितं मन्दिरं झटिति एव जले निमग्नं गतम्। सममेव सस्यानि च जले निमग्नानि जातानि। उनामण्डले गृहाणि, व्यापारिकप्रतिष्ठानाति च जले निमग्नानि इति सूचना प्राप्यते। राजधान्यां शिमलायां अपि वृष्टि: जायमाना वर्तते।

राष्ट्रपति-सम्मान

राष्ट्रपतिः द्रौपदी मुर्मू फिजी, न्यूजीलैण्ड, तिमोर लेस्टे च देशत्रयस्य यात्रां सम्पाद्य स्वदेशं प्रत्यागता। यात्रायाः अन्तिमे चरणे राष्ट्रपतिः तिमोर् लेस्टे-नगरं गतवती। यत्र देशस्य सर्वोच्चनागरिकपुरस्कारेण तिमोर्-लेस्टे-आर्डर्-इत्यस्य ग्राण्ड्-कालर्-इत्यनेन सा पुरस्कृता । गतदिने राष्ट्रपतिः दिलीनगरे राष्ट्रपतिना प्रधानमन्त्रिणा च साकं द्विपक्षीयां चर्चाम् अकरोत्। अत्रावसरे परस्पर-सहकार्य-विषयकानि त्रीणि ज्ञापनपत्राणि अपि हस्ताक्षरितानि।

प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रपतिः द्रौपदी मुर्मुः वर्यायाः तिमोर-लेस्टे-इत्यस्य सर्वोच्च-नागरिक-सम्मानेन ग्रेंडकॉलर ऑफ ऑर्डर इत्यनेन सम्माननं पुरस्सरं अजस्त्रं गौरवं प्रकटितम्। एकस्मिन् सामाजिक अन्तर्जालपटले श्रीमोदिना समुदीरितं यत् भारतस्य राष्ट्रपतिः तिमोरलेस्टे-देशस्य सर्वोच्चनागरिक सम्मानेन पुरस्कृत इति देशस्य कृते गौरवपूर्णो विषये विद्यते।

पेरिस-ओलम्पिक

सप्ताहत्रयं यावत् रोमाञ्चकारिणां क्रीडाकार्यक्रमाणां अनन्तरं पेरिस् ओलम्पिकक्रीडायाः अद्य रात्रौ सम्पन्नता अस्ति। समापनसमारोहस्य आरम्भः भारतीयसमयानुसारं रात्रौ सार्ध द्वादशवादने भविष्यति। अस्मिन् काले अशीतिः सहस्राणि प्रेक्षकाः अस्मिन् क्रीडाङ्गणे उपस्थिताः भवितुम् अर्हन्ति । समापनसमारोहे अष्टाविंशत्युत्तरद्विसहस्र तमे वर्षे लॉस एजिलिस नगरे आगामि ओलम्पिकक्रीडायाः आयोजनसमित्यै ओलम्पिकध्वजः समर्पितः भविष्यति। अस्मिन् ओलम्पिकक्रीडायां भारतं एकं रजतपदकं पञ्चकांस्यपदकानि च प्राप्य एकसप्ततितमं स्थानं प्राप्तवान् । मनुभाकरः कांस्यपदकं प्राप्य अस्मिन् ओलम्पिकक्रीडायां भारताय प्रथमं पदकं दत्त्वा ऐतिह्य निर्माणं कृतवती । सा ओलम्पिक क्रीडायां पदकं प्राप्तवती प्रथमा महिला अस्ति । सा सरबजोतसिंहेन सह १० मीटर्मिश्रितदलयुक्त लक्ष्यभेद स्पर्धायां अपरं कांस्यपदकं प्राप्तवती, एकस्मिन् एव ओलम्पिकक्रीडायां पदकद्वयं प्राप्तवती प्रथमा महिला इति नूतनं अभिलेखं च कृतवती ।

।। इति वार्ता: ।।